नलोपाख्यानम्

22

बृहदश्व उवाच।

ततो विदर्भान्संप्राप्तं सायाह्ने सत्यविक्रमम्।

ऋतुपर्णं जना राज्ञे भीमाय प्रत्यवेदयन्॥ ३-७१-१॥

स भीमवचनाद्राजा कुण्डिनं प्राविशत्पुरम्।

नादयन्रथघोषेण सर्वाः सोपदिशो दश॥ ३-७१-२॥

ततस्तं रथनिर्घोषं नलाश्वास्तत्र शुश्रुवुः।

श्रुत्वा च समहृष्यन्त पुरेव नलसंनिधौ॥ ३-७१-३॥

दमयन्ती च शुश्राव रथघोषं नलस्य तम्।

यथा मेघस्य नदतो गम्भीरं जलदागमे॥ ३-७१-४॥

नलेन संगृहीतेषु पुरेव नलवाजिषु।

सदृशं रथनिर्घोषं मेने भैमी तथा हयाः॥ ३-७१-५॥

प्रासादस्थाश्च शिखिनः शालास्थाश्चैव वारणाः।

हयाश्च शुश्रुवुस्तत्र रथघोषं महीपतेः॥ ३-७१-६॥

ते श्रुत्वा रथनिर्घोषं वारणाः शिखिनस्तथा।

प्रणेदुरुन्मुखा राजन्मेघोदयमिवेक्ष्य ह॥ ३-७१-७॥

दमयन्त्युवाच।

यथासौ रथनिर्घोषः पूरयन्निव मेदिनीम्।

मम ह्लादयते चेतो नल एष महीपतिः॥ ३-७१-८॥

अद्य चन्द्राभवक्त्रं तं न पश्यामि नलं यदि।

असंख्येयगुणं वीरं विनशिष्याम्यसंशयम्॥ ३-७१-९॥

यदि वै तस्य वीरस्य बाह्वोर्नाद्याहमन्तरम्।

प्रविशामि सुखस्पर्शं विनशिष्याम्यसंशयम्॥ ३-७१-१०॥

यदि मां मेघनिर्घोषो नोपगच्छति नैषधः।

अद्य चामीकरप्रख्यो विनशिष्याम्यसंशयम्॥ ३-७१-११॥

यदि मां सिंहविक्रान्तो मत्तवारणवारणः।

नाभिगच्छति राजेन्द्रो विनशिष्याम्यसंशयम्॥ ३-७१-१२॥

न स्मराम्यनृतं किं चिन्न स्मराम्यनुपाकृतम्।

न च पर्युषितं वाक्यं स्वैरेष्वपि महात्मनः॥ ३-७१-१३॥

प्रभुः क्षमावान्वीरश्च मृदुर्दान्तो जितेन्द्रियः।
रहो ऽनीचानुवर्ती च क्लीबवन्मम नैषधः॥ ३-७१-१४॥
गुणांस्तस्य स्मरन्त्या मे तत्पराया दिवानिशम्।
हृदयं दीर्यत इदं शोकात्प्रियविनाकृतम्॥ ३-७१-१५॥

बृहदश्व उवाच।

एवं विलपमाना सा नष्टसंज्ञेव भारत।
आरुरोह महद्वेश्म पुण्यश्लोकदिदृक्षया॥ ३-७१-१६॥
ततो मध्यमकक्षायां ददर्श रथमास्थितम्।
ऋतुपर्णं महीपालं सहवार्ष्णेयबाहुकम्॥ ३-७१-१७॥

kakṣā *f* – стена, ограда;

ततो ऽवतीर्य वार्ष्णेयो बाहुकश्च रथोत्तमात्।
हयांस्तानवमुच्याथ स्थापयामासतू रथम्॥ ३-७१-१८॥
सो ऽवतीर्य रथोपस्थादृतुपर्णो नराधिपः।
उपतस्थे महाराज भीमं भीमपराक्रमम्॥ ३-७१-१९॥
तं भीमः प्रतिजग्राह पूजया परया ततः।
अकस्मात्सहसा प्राप्तं स्त्रीमन्त्रं न स्म विन्दति॥ ३-७१-२०॥
किं कार्यं स्वागतं ते ऽस्तु राज्ञा पृष्टश्च भारत।
नाभिजज्ञे स नृपतिर्दुहित्रर्थे समागतम्॥ ३-७१-२१॥
ऋतुपर्णो ऽपि राजा स धीमान्सत्यपराक्रमः।
राजानं राजपुत्रं वा न स्म पश्यति कंचन।
नैव स्वयंवरकथां न च विप्रसमागमम्॥ ३-७१-२२॥
ततो विगणयन्राजा मनसा कोसलाधिपः।
आगतो ऽस्मीत्युवाचैनं भवन्तमभिवादकः॥ ३-७१-२३॥
राजापि च स्मयन्भीमो मनसाभिविचिन्तयत्।
अधिकं योजनशतं तस्यागमनकारणम्॥ ३-७१-२४॥
ग्रामान्बहूनतिक्रम्य नाध्यगच्छद्यथातथम्।
अल्पकार्यं विनिर्दिष्टं तस्यागमनकारणम्॥ ३-७१-२५॥
नैतदेवं स नृपतिस्तं सत्कृत्य व्यसर्जयत्।
विश्राम्यतामिति वदन्क्लान्तो ऽसीति पुनः पुनः॥ ३-७१-२६॥
स सत्कृतः प्रहृष्टात्मा प्रीतः प्रीतेन पार्थिवः।

राजप्रेष्यैरनुगतो दिष्टं वेश्म समाविशत्॥ ३-७१-२७॥

ऋतुपर्णे गते राजन्वार्ष्णेयसहिते नृपे।

बाहुको रथमास्थाय रथशालामुपागमत्॥ ३-७१-२८॥

स मोचयित्वा तानश्वान्परिचार्य च शास्त्रतः।

स्वयं चैतान्समाश्वास्य रथोपस्थ उपाविशत्॥ ३-७१-२९॥

दमयन्ती तु शोकार्ता दृष्ट्वा भाङ्गस्वरिं नृपम्।

सूतपुत्रं च वार्ष्णेयं बाहुकं च तथाविधम्॥ ३-७१-३०॥

चिन्तयामास वैदर्भी कस्यैष रथनिस्वनः।

नलस्येव महानासीन्न च पश्यामि नैषधम्॥ ३-७१-३१॥

वार्ष्णेयेन भवेन्नूनं विद्या सैवोपशिक्षिता।

तेनास्य रथनिर्घोषो नलस्येव महानभूत्॥ ३-७१-३२॥

आहो स्विदृतुपर्णो ऽपि यथा राजा नलस्तथा।

ततो ऽयं रथनिर्घोषो नैषधस्येव लक्ष्यते॥ ३-७१-३३॥

एवं वितर्कयित्वा तु दमयन्ती विशां पते।

दूतीं प्रस्थापयामास नैषधान्वेषणे नृप॥ ३-७१-३४॥